# Shri Akhandanandadashakam

# श्रीअखण्डानन्ददशकम्

## Document Information

Text title : Shri Akhandanandadashakam

File name : akhaNDAnandadashakam.itx

Category : deities_misc, gurudev, rAmakRiShNa, dashaka

Location : doc_deities_misc

Author : Swami Bhavaghanananda

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# श्रीअखण्डानन्ददशकम्

रामकृष्णगतप्राणमखण्डानन्दनामकम् ।
नमामि स्वामिपादं तं शुद्धसत्त्वसमन्वितम् ॥ १॥

सद्ब्राह्मणकुलोद्भूतं नानागुणविभूषितम् ।
वन्दे गङ्गाधरं चाहं बाल्यादेव विवेकिनम् ॥ २॥

अवतारवरिष्ठेन कृपा यस्मिन् स्वतः कृता ।
नमस्तस्मै कृतार्थाय नैष्ठिकब्रह्मचारिणे ॥ ३॥

विषयवीतरागाय संसारत्यागिने तथा ।
नमो मायाविमुक्ताय संन्यासव्रतधारिणे ॥ ४॥

साहसेनामितेनैव तीर्थभ्रमेण तत्परम् ।
परिव्राजमहं वन्दे युवानमकुतोभयम् ॥ ५॥

भ्रमणदति विज्ञं च दीन-दुःखेन कातरम् ।
नमामि जीवसेवायै सर्वार्थार्पितजीवनम् ॥ ६॥

दुर्भिक्ष पीड़ैतानां तु बहुधा प्राणरक्षकम् ।
नमामि नित्यं शिरसा अनाथबालसेविनम् ॥ ७॥

जीवेषु शिवबुद्धिश्चाप्यासीद् यस्य स्वभावतः ।
तस्य पादद्वयं चापि वन्दे नित्यं विशेषतः ॥ ८॥

बह्वनामाश्रितानां तु भवव्याधिविनाशकम् ।
नमामि सद्भाचार्यं तं सर्वेषां च हितैषिणम् ॥ ९॥

परिणामिवयस्येव त्यक्तपूतकलेवरम् ।
नौमि गङ्गाधरं चैव रामकृष्णे समाहितम् ॥ १०॥

इति स्वामिभावघनानन्दविरचितं “श्रीमदखण्डानन्ददशकम्” सम्पूर्णम् ।
प्रणाममन्त्रः-

अखण्डानन्दसिन्धौ यः सततं वै मीनायते ।
कर्मयोगातिनिष्ठायाखण्डानन्दाय ते नमः ॥

Proofread by Aruna Narayanan

*Shri Akhandanandadashakam*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*